This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-203

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय

हस्तलिखित संग्रह

दाखल क्र. M203 विषय વૈદિક કર્મકાંડ

नांव ઉપનયન વિધી

लेखक / लिपीकार —

पृष्ठ ૨૧ काळ — [✓ पूर्ण] / अपूर्ण

Checked 2012

M-203

उदीचीन मवपे

श्री ॥ गणपतिप्रसंन्नः ॥ उपनंयाख्यास्यामः सप्तवर्षं ब्राह्मणमु
पनयीतैकादशवर्षं राजन्यं द्वादशवर्षं वैश्यं वसंते ब्राह्मणं ग्री
ष्मे राजन्यं शरदि वैश्यमापूर्यमाणपक्षे पुण्ये नक्षत्रे विशेषे
ण पुंनामधेयेषु ग्मोः ब्राह्मणानन्नेन परिविष्य पुण्याहं स्व
स्त्ययनमृद्धिमिति वाचयित्वा शिखस्य कुमारस्य केशान्वापयि
त्वा स्नातमलंकृतमहतवासः परिधाप्य प्राचीनप्रवणे प्रागुदक्
प्रवणे समे वा देशे उद्धत्यावोक्ष्याग्निं मथित्वा लौकिकं वाहृत्य न्यु
प्योपसमादधाति सिषिचोदक् प्रागग्रैर्दर्भैरग्निं परिस्तृणोत्यपि
वोदगग्राः पश्चात्पुरस्ताच्च भवंति दक्षिणानुत्तरान्करोत्युत्तरा
न धरान्यदि प्रागुदगग्रान्दक्षिणेनाग्निं ब्रह्मायतने दर्भा

॥१॥ सं॰स्तीर्य मयि गृह्णामि यो नो अग्निरिति द्वाभ्यामात्मन्नग्निं गृही
त्वोत्तरेणाग्निं दर्भान्संस्तीर्य यथार्थं द्रव्याणि प्र॰ युन[illegible]नूत्य
श्मानमहतं वासो॰जिनं मौंजीं मेखलां त्रिवृतां ब्राह्मणस्य ज्या॰
राजन्यस्यावीसूत्रं वैश्यस्य बै॰ल्वं पालाशं दंडं ब्राह्मणस्य
नै॰यग्रोधं॰ राजन्यस्यौदुंबरं वैश्यस्यैकविं॰शतिदारुमिध्मं॰
संनह्य द्याहुतिमात्रं वा तस्मिन्न छम्याः परिधीनिध्ममुपसंन
ह्यति दर्वीं कूर्चमाज्यस्थाली प्रणीताप्रणयनं येन चार्थः स
र्वं देवसर्वाणि यथोपपादयेत्तस्मिन्काले ब्रह्मा यज्ञोपवीतं कृ
त्वाप आचम्य अपरेणाग्निं दक्षिणातिक्रम्य ब्रह्मसदनात्तृणं नि ॥१॥
रस्याप उपस्पृश्याग्निमुख उपविशति समावप्रच्छिनाग्रौ दर्भौ

प्रादेशमात्रौ पवित्रे कृत्वान्येन नखाच्छित्वाद्भिरनुमृज्य पवित्रांत
र्हिते पात्रेप आनीयोपवित्रकृ पूरयित्वोदगग्राभ्यां पवित्राभ्यां
त्रिरुत्पूयोत्तरेणाग्निं दर्भेषु सादयित्वा दर्भैरपिदधाति ति
रः पवित्रं प्रोक्षणीः सं॰स्कृत्य यथापुरस्ताद्बिलवन्त्युत्तानि
कृत्वा विषायेध्मं त्रिः सर्वाभिः प्रोक्षति दर्वीं निष्टप्य संमृ
ज्य पुनर्निष्टप्य निदधाति संमार्गानभ्युक्ष्याग्नावादधात्या
ज्यं विलाप्य पवित्रान्तर्हितामाज्यस्थाल्यामाज्यं निरुप्यो
दीचोंगारान्निरूह्य तेष्वधिश्रित्यावद्योत्य दर्भतरुणाभ्यां
प्रत्यस्य त्रिः पर्यग्निकृत्वोदगुद्वास्यांगारान्प्रत्यूह्योदगग्रा
भ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय पवित्रे प्रोक्ष्याग्नौ

॥२ वोयाय॥१॥शम्याभिःपरिदधात्यपरेणाग्निमुदीचीनकुंबां
मध्यमांनिदधातिदक्षिणाग्निंसंस्पृष्टांमध्यमयाप्राची
नकुंबामुत्तरेणाग्निंसंस्पृष्टांमध्यमयाप्राचीनकुंबा
मपरेणाग्निंप्राङ्मुखउपविशतिदक्षिणतोयज्ञोपवीत्याचा
न्तःकुमारउपविश्यान्वारभतेथपरिषिंचत्यदितेनुम
न्यस्वेतिदक्षिणतःप्राचीनमनुमन्यस्वेतिपश्चादुदीचीनं
सरस्वत्यनुमन्यस्वेत्युत्तरतःप्रीचीनंदेवसवितःप्रसुवेति
सर्वतःप्रदक्षिणंपरिषिंच्येध्ममभ्याधायादधातिययंत ॥२
इध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेद्धवर्धयचास्मान्प्र
जयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहेत्यथद

र्व्याजुहोत्युत्तरंपरिधिमन्ववहृत्यदर्वींप्रजापतयेमनवेस्वा
हेतिमनसाध्यायन्दक्षिणाप्रांचमृजुंदीर्घंसंततंजुहोतिद
क्षिणंपरिधिसंधिसंधिमन्ववहृत्येंद्रायस्वाहेतिप्रांचमृ
[illegible]जुमाघारावाघार्याज्यभागौजुहोत्यग्नयेस्वाहेत्युत्त
रार्धपूर्वार्धेसोमायस्वाहेतिदक्षिणार्धपूर्वार्धेतावंतरे
णेतरयाजुहोत्युक्तोपहजातवेदःपुरस्तादग्नेविद्धिकर्मक्रि
यमाणंयथेदं॥त्वंभिषग्भेषजस्यासिकर्तात्वयागामश्वा
न्पुरुषान्सनेम॥स्वाहा॥यातिरश्चीनिपद्यसेहंविधरणी
इति॥तांत्वाघृतस्यधारयाग्नौसंराधनीयजेस्वाहा॥सं
राधनीदेव्यैस्वाहाप्रसाधन्यैदेव्यैस्वाहेति॥२॥सर्वदर्विलोमा

१२ णमेषकल्पो मंत्रांते नित्यस्वाहाकारो मंत्रास्वमुष्मैस्वाहेतियथा
देवतंभूर्भुवःस्वरितिव्याहृतिभिर्जुहोत्येकैकशःसमस्ताभिश्चा
युर्दाअग्नइत्येषा॥आयुर्दादेवजरसंगृणानोघृतप्रतीकोघृ
तपृष्ठोअग्ने॥घृतंपिबन्नमृतंचारुगव्यंपितेवपुत्रंजरसेन
येमंःस्वाहेमंमेवरुण।तत्वायामि।त्वंनोअग्नेसत्वंनोअग्ने
त्वमग्नेअयास्ययासन्मनसाहितः॥अयासन्हव्यमूहि
षेयानोधेहिभेषजंःस्वाहा॥प्रजापतइत्येषा॥यदस्यकर्म
णोत्यरीरिचंयद्वान्यूनमिहाकरं॥अग्निष्टत्स्विष्टकृद्विद्वा ॥२॥
न्सर्वंःस्विष्टंःसुहुतंकरोतुमे॥अग्नयेस्विष्टकृतेसुहुतहुते
सर्वहुतआहुतीनांकामानांःसमर्धयित्रेस्वाहेत्युत्तरार्धपूर्वार्धे

र्वेसःसक्ताभिस्तराभिराहुतिभिर्जुहोत्यत्रैकेजयाभ्यातानान्राष्ट्रभृ
तइत्युपजुहृतिपुरस्तात्स्विष्टकृतःश्चित्तंचस्वाहा।चित्तिश्चस्वाहे
तिजयाजुहोतिचित्तायस्वाहाचित्तयेस्वाहेतिचाग्निर्भूतानामधि
पतिःसमावत्वित्यभ्यातानानस्मिकर्मन्नस्मिन्क्षत्रइत्यभ्यातानाने
मनुषजतिपितरःपितामहाइतिप्राचीनावीतीजुहोत्युपतिष्ठ
तेवर्त्ताषाडूतधामेतिराष्ट्रभृतःपर्यायमनुहुत्यतस्मैस्वाहेति
पूर्वामाहुतिंजुहोतिताभ्यःस्वाहेत्युत्तरामग्रेणोत्तरपरिधिसं
धिमश्मानंनिधायदक्षिणेनपादेन॥३॥कुमारमास्थापयत्या
तिष्ठेममश्मानमश्मेवत्वंःस्थिरोभव॥प्रमर्णीहिदुरस्यून्स
हस्वपृतनायतइत्यथैनमहतंवासःपरिधापयतिपूर्वंनिधाय

या॥अकृंतन्नवयंन्याअतन्वत॥याश्चदेवीरंतानभितोददंततास्त्वा
४ देवीर्जरसासंव्ययंत्वायुष्मानिदंपरिधत्स्ववासः॥परिधत्तधत्तवा
ससैनंशतायुषंकृणुतदीर्घमायुः।बृहस्पतिःप्रायच्छद्वासएतत्सो
मायराज्ञेपरिधातवाउ॥जरांगच्छासिपरिधत्स्ववासोभवाकृष्टी
नामभिशस्तिपावा॥शतंचजीवशरदःसुवर्चारायश्चपोषमुपसं
व्ययस्वेतिपरिधाप्याभिमंत्रयतेपरीदंवासोधिधाःस्वस्तयेभूरापी
नामभिशस्तिपाउ॥शतंचजीवशरदःपुरूचीर्वसूनिचार्योवि
भजासिजीवन्नित्यथैनंमेखलयानाभिदेशेत्रिःप्रदक्षिणंपरिव्य
यतिद्विरित्येके॥पाडुरितात्परिबाधमानाशर्मवरूथंपुनतीनआ ४
गात्॥प्राणापानाभ्यांबलमाभरंतीस्वसादेवानांसुभगामेख

लेयमित्युत्तरतोनाभेस्त्रिवृतंग्रंथिंकृत्वादक्षिणतोनाभेःपरि
कर्षत्यथास्माअजिनमुत्तरीयंकरोतिमित्रस्यचक्षुर्धरुणंधरी
यस्तेजोयशस्विस्थविरंसमिद्धं॥अनाहनस्यंवसनंजरिष्णु
परीदंवाज्यजिनंधत्स्वासावदितिस्तेकक्षांबध्नातुवेदस्यानु
वक्तवेमेधायैश्रद्धायाअनूक्तस्यानिराकरणायब्रह्मणेब्रह्म
वर्चसायेतिकृष्णाजिनंब्राह्मणस्यरौरवंराजन्यस्यबस्ताजि
नंवैश्यस्याथैनंपरिददातिपरीममिंद्रब्रह्मणेमहेश्रोत्राय
दध्मस्यथैनंजरिमाणयेज्योक्श्रोत्रेअधिजागरदितिब्राह्मणं
परीममिंद्रब्रह्मणेमहेराष्ट्रायदध्मस्यथैनंजरिमाणयेज्योग्

तोऽहं अधिजागरदिति राजन्यं परीममिंद्रअलणे महेपोषाय
॥५ दधनस्यथैनं जरिमाणं येज्योकृपोषे अधिजागरदिति वैश्यं त
म परेणशुत्रिमुदेचमुप्रवेश्यहुतोछेषणं प्राशयति च यिमेधांतयि
प्रजानित्येते संनतः एषद्दाज्यमेकं प्राशयति योगेयोगेतव
स्तरमिमगन्न आयुषे रुधिरिति द्वाभ्यां प्राश्नंतं समीक्षते प्राश
य. येक आचांतमुपस्पर्शयि.त्वाभिमंत्रयते शतमिन्नुशरदो
अंतिदेवायत्रानश्चक्राजेरसंतन्नं नो॥ पुत्रासोयत्रपितरो भ ॥५
वंति मानो मध्यारीरिषतायुर्गंतोः॥४॥ प्रथमः पटलः॥१॥ आगं
त्तासमगन्महि प्रसमर्त्यंयुयोतन॥ अरिष्टाः संचरेमहि स्व
चरतादिह स्वस्त्यागृहेभ्य इति प्रदक्षिणमग्निं परिक्रामंतम

योः फल्गुन्योर्हस्ते चित्रायां विशाखयोर्वैतुषु स्नापयच्चापस्नाग्द
॥११ ताग्निमुपसमाधाय स्वाहुतिपर्यंतं कृत्वा पाणांशीर्षे समिधमाद
धाति इमं स्तोममर्हते जातवेदसे रथमिव संमहेमा मनी
षया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयंत
वस्वाहेत्यथ व्याहृतीभिर्जुहोति यथा पुरस्तात् त्र्यायुषं जमदग्नेः क
श्यपस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषं स्वाहे
त्यमं मे वरुण तत्त्वायामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयासि ॥११
प्रजापतेनयदस्यकामनेणोस्परीरिभामिलिजया॰ स्युपद्गुलातयाथो॰
ब्राह्मणान्नन्नेन परिविष्य पु॰ श्रिमिति वाचयित्वा अग्रे नाविष्ठेअन्त ग्नप्र॰
प्रतमभारिषद्युतेत्र तविस्य अन्यउदुत्यं चित्रमिति द्वाभ्यां
दिवस्युपाति ष्ठते उदु

ह्लियमुपेत्यष्टाचत्वारिंशाद्वर्षाणि चतुर्विंशंद्वादशयावद्ग्रहणं
वानवेद्याव्रतस्यात्काण्डोपाकरणेकांडविसर्गेचसदसस्पति
मभ्दुतप्रियमिंद्रस्यकाम्यं। सनिंमेधामयासिषंस्वाहेति
कांडऋषिंद्वितीयइमंमेवरुणतत्वायामित्वंनोअग्नेसत्वं
नोअग्नेत्वमग्नेअयासिप्रजापतेयदस्यकर्मणोत्यरीरि
चमितिचान्वैकेजयाभ्यातानान्राष्ट्रभृतन्हुत्वपस्तुव्ह
लियथापुरस्तात्।।८ इतीश्रीहिरण्यकेशीसूत्रेद्वि
तीयःपटलः।।२ अधीत्यवेदंस्नानंलक्ष्णंव्याख्यास्यामः
उदगयनआपूर्यमाणपक्षेरोहिण्यांमृगशिरसितिष्यउत्तर

```
[OrderDescription]
,CREATED=16.09.19 14:40
,TRANSFERRED=2019/09/16 at 14:43:17
,PAGES=8
,TYPE=STD
,NAME=S0001841
,Book Name=M-203-UPNAYAN VIDHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,
```